॥ श्रीरामः शरणम् ॥

प्रतिगुरुवासरं प्रकाश्यते

सम्पादकः
डा. कृष्णप्रसादः जि.

आदिशिला

साप्ताहिकी संस्कृतपत्रिका

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥

प्रथमखण्डस्य | श्रीपराभवसंवत्सरः कार्तिकशुक्लनवमी गुरुवासरः — 19 November 2026 | प्रथमसङ्ख्या

शास्त्रमञ्जूषा

अलङ्कारसुधानिधौ लुप्तपद्योद्धारः

(डा. आर्. शङ्करमहाभागस्य पद्यपूरणकौशलम्) — सम्पादकः : कृष्णप्रसादः जि.

न खल्वेतदविदितं प्रेक्षावतां यत्किल ताडपत्रेषु निबद्धानां प्राचीनग्रन्थानां कृमिदंशेन पत्रत्रुटनेन लेखकानामनवधानेन च भूयांसो भागाः कालकवलतामुपागता इति। अवशिष्यन्ते क्वचिद्वर्णाः क्वचिच्च पदखण्डाः। न तैरर्थः प्रतीयते। न वा छन्दः पूर्यते। तत्र च लुप्तान्पादान्पुनः सङ्घटयितुं न खलु सर्वः प्रभवति। अपेक्ष्यते हि तत्र छन्दोज्ञानं शास्त्रपरिचयः कविप्रतिभा च युगपदेव।

विदितमेव साहितीजुषां यच्छ्रीसायणाचार्यविरचितोऽलङ्कारसुधानिधिर्नाम साहित्यशास्त्रग्रन्थो मैसूरुविश्वविद्यानिलयस्य प्राच्यविद्यासंशोधनालयेन २०२४ तमे वर्षे प्रकाशं नीत इति। संशोधितश्चायं बि. एन्. शशिकिरणसहितानां शतावधानिनां डा. रा. गणेशमहोदयानां महता परिश्रमेण। ग्रन्थस्यास्योपोद्घातः किल केवलं ग-मातृकायामुपलभ्यते। तस्या अप्याद्यानि द्वित्राणि पत्राणि लुप्तानि। अत एव मङ्गलपद्येष्वपि महती त्रुटिः। द्वितीयस्य पद्यस्य **'श्र'** इत्येको वर्णः **'रिपुरसिक'** इति च कश्चन पदखण्डः, एतावदेवावशिष्टम्। तृतीयस्य तु पद्यस्य मातृकायामियमवस्था। लुप्तमेकैकमक्षरं बिन्दुरेखया सूचितम्।

मातृकायामवशिष्टं तृतीयं पद्यम्

.....लक्ष्य...मौ व्यञ्जय-

.....

ओजः स्वात्मनि सम्प्रसादमहितां प.....

..... ॥ ३ ॥

एवं प्रथमपादे त्रयोदश वर्णा लुप्ताः, तृतीये षट्। द्वितीयचतुर्थौ तु पादौ निःशेषमेव नष्टौ।

महीयान्हि कवित्वस्य संशोधकत्वस्य च दृश्यते विरोधः। संशोधकः किल प्रमाणमेवानुसरति न तु कल्पनाम्। कविस्तु कल्पनयैव जीवति न पुनः प्रमाणेन। अस्य तु सुकवेः शास्त्रज्ञस्य च डा. आर्. शङ्करमहाभागस्य राजारामसूनोः प्रतिभा प्रमाणमनुसरति, प्रमाणं च प्रतिभयोज्ज्वलति। तेनैव हि तृतीयमिदं पद्यं समग्रमपि पुनरुज्जीवितम्। कथं चैतत्सम्पादितमिति तेनैव स्वयमाङ्ग्लभाषया लिखिते कस्मिंश्चिट्टिप्पणे क्रमशो विवृतम्। तदनुसृत्य वयमत्र दिङ्मात्रं प्रदर्शयामः।

डा. आर्. शङ्करमहाभागेन पूरितं पद्यम्

पादौ वाच्यपथातिगौ श्रुतिशिरोलक्ष्यक्रमौ व्यञ्जय-
ञ्छ्रीवत्साय च कौस्तुभाय च दिशन्दिव्यामलङ्कारताम्।
ओजः स्वात्मनि सम्प्रसादमहितां पद्मां भुजाभ्यन्तरे
माधुर्यं मृदुनि स्मिते च कलयन्नारायणोऽव्यात्स नः ॥ ३ ॥

रक्तवर्णेन मुद्रिता भागाः पूरिताः, कृष्णवर्णास्तु मातृकायामवशिष्टाः।

पूरणप्रक्रिया

तत्रादिमम्— अवशिष्टैरेव वर्णैः शार्दूलविक्रीडितमिदमिति स्फुटम्। ततश्च प्रतिपादं कियन्तो वर्णाः पूरणीया इति सुखमवगतम्।

अपरम्— पद्यद्वयानन्तरं विषयप्रस्तावात्प्राक्च निबद्धत्वादिदमपि मङ्गलपद्यमेवेति निश्चितम्। **'व्यञ्जयन्'** इति पुंलिङ्गनिर्देशात्स्तूयमानो देवः पुमानेव। प्रथमपद्ये गणेशस्य नमस्कृतत्वाच्छिवो विष्णुर्वेति संशयः परिशिष्यते।

इतरत्— लक्ष्य-व्यञ्जयन्-ओजः-सम्प्रसादेत्येतानि पदानि साहित्यशास्त्रस्य पारिभाषिकाणि, अर्थान्तरस्य च वाचकानि। अतः शास्त्रपदैरेव श्लेषं घटयति कविरिति प्रतीयते। ग्रन्थनाम्नि चालङ्कारशब्दो भूषणे काव्यालङ्कारे च श्लिष्टः। तत्सोऽपि पद्येऽस्मिन्क्वचिदवश्यं स्यादिति।

अन्यत्— **'लक्ष्य'** **'व्यञ्जयन्'** इति लक्ष्यव्यङ्ग्ययोः स्मारके। वाच्यमेव तत्र न्यूनम्। वाच्यलक्ष्यव्यङ्ग्यानां च स एव प्रसिद्धः क्रमः। अतो वाच्यशब्दः प्रथमपाद एव। तथौजःप्रसादयोस्तृतीयपादे दृष्टत्वान्माधुर्यं चतुर्थपादे निवेशनीयम्। एवं चोत्तरार्धस्य गुणत्रयेण व्याप्तत्वादलङ्कारशब्दो द्वितीयपाद एवेति परिशेषात्सिद्धम्।

तदपरम्— **'लक्ष्यक्रमौ'** इति द्विवचनान्तं विशेषणम्। देवस्य किं नाम द्वित्ववत्सर्वेभ्यश्चाभ्यर्हितमिति विचारे पादावेवेति स्फुरति। क्रमो नाम पदविन्यासः। स च श्रुतिशिरःसु लक्ष्यते। श्रुतीनां हि शिरांस्युपनिषदः। तासु च भगवतः पादौ विन्यस्तौ। ततश्च **'श्रुतिशिरोलक्ष्यक्रमौ'** इति लब्धम्। अवशिष्टांश्च चतुरो वर्णान् **'पथातिगौ'** इति पूरयित्वा **'वाच्यपथातिगौ'** इति विशेषणं घटितम्, वाचां पन्थानमतिक्रान्ता वनिर्वचनीयाविति यावत्। एवं प्रथमः पादः समग्रः सम्पन्नः।

अन्यच्च— **'ओजः स्वात्मनि'** इत्यत्र द्वितीयान्तं सप्तम्यन्तं च। अयमेव क्रमोऽवशिष्टयोर्गुणयोरपि कवेरभिप्रेत इत्यनुमीयते। **'सम्प्रसादमहिताम्'** इति तु स्त्रीलिङ्गं विशेषणम्। तस्य विशेष्यं देवस्य प्रिया काचिद्देव्येव भवितुमर्हति। सा च पकारादिः, मातृकायां पकारेणैव पाठस्य विरतत्वात्। पार्वत्याः पकारादि

छन्दोऽनुगुणं लघु नाम न सुलभम् । लक्ष्म्यास्तु **'पद्मा'** इति प्रसिद्धम् । अतो विष्णुरेवात्र स्तूयत इति निर्णीतम् । पद्मायाश्च निवासो भगवतो वक्षःस्थलम् । तदेव छन्दोऽनुरोधेन **'भुजाभ्यन्तरे'** इति निबद्धम् ।

अहो पद्यस्यास्य सौभाग्यम्! दीयतां तावद्दृष्टिः सहृदयैः । प्रथमे पादे वाच्यलक्ष्यव्यङ्ग्यानि । द्वितीयेऽलङ्कारः । उत्तरार्धे चौजःप्रसादमाधुर्याणि । एवं समग्रमपि साहित्यशास्त्रमेकस्मिन्नेव पद्ये भगवतो विग्रहे निवेशितम् । न खल्वत्रैकमपि शास्त्रपदं हठादाकृष्टं प्रत्युतैकैकमपि रसत एव शय्यामनुप्राप्तम् । श्रीवत्सकौस्तुभौ किल भगवतो भूषणे । तयोरपि भगवानेवालङ्कारतां दिशतीति भूषणानामपि भूषणमयमिति गम्यते । ओजः स्वात्मनि, प्रसन्ना पद्मा वक्षसि, माधुर्यं मृदुनि स्मिते—इति त्रयाणां गुणानां त्रीण्यधिकरणानि । **'लक्ष्यक्रमौ व्यञ्जयन्'** इत्यत्र तु संलक्ष्यक्रमव्यङ्ग्योऽपि ध्वनिप्रभेदः स्मर्यते, यो ह्यस्यैव ग्रन्थस्य द्वितीय उन्मेषे विचार्यत इति नो बुद्धिः ।

न च वाच्यं कल्पनामात्रमिदमिति । प्रत्येकं हि पदमवशिष्टेनैव केनचिद्वर्णखण्डेन नियम्यते । छन्दश्च सर्वत्राविकलम् । पादसन्धावपि **'व्यञ्जयञ्छ्रीवत्साय'** इति व्याकरणमनुसृतम् । न खलु वयं ब्रूमो यत्सायणेनैवमेव लिखितमिति । न हि तन्मातृकामन्तरेण निश्चेतुं शक्यम् । किन्तु यदि कोऽपि साहित्यरसिको मातृकावृत्तान्तमजानन्निदं पद्यं शृणुयात्तदा सायणाचार्यस्यैवेदमिति निःसंशयं ब्रूयात् । अत एव च ग्रन्थसम्पादकैरपि कृतज्ञतानिवेदने **'प्रतिभावते तस्मै नमः'** इति सादरमभिहितम् । आङ्ग्लभाषामय्यां च प्रस्तावनायां बहूनां क्लिष्टपद्यानां निर्दुष्टं पूरणमनेन कृतमिति प्रकटिता कृतज्ञता ।

एवंविधं पद्योद्धारं कस्य वा सचेतसश्चेतो न प्रसादयेत्? कस्य च संशोधकस्य तनुं न पुलकयेत्? कं च सहृदयं मातृकाचर्चाया नीरसतां विस्मार्य काव्यरसं नास्वादयेत्? विरलाः खल्विदानीमेवंविधाः शास्त्रज्ञाः सुकवयः । तदनुस्रियतामियं सरणिरस्मद्युवभिः संशोधकैः, समेधतां च श्रीमतः शङ्करमहाभागस्य सरस्वतीसेवेति प्रार्थ्यतेऽस्माभिः ।

॥ इति शिवम् ॥

